শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীদ্বাদশনামপঞ্জরস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীদ্বাদশনামপঞ্জরস্তোত্রম্ ॥

পুরস্তাত্ কেশৱঃ পাতু চক্রী জাম্বূনদপ্রভঃ।
পশ্চান্নারাযণঃ শঙ্খী নীলজীমূতসন্নিভঃ॥ ১ ॥

ইন্দীৱরদলশ্যামো মাধৱোর্ধ্ৱং গদাধরঃ।
গোৱিন্দো দক্ষিণে পার্শ্বে ধন্বী চন্দ্রপ্রভো মহান্॥ ২ ॥

উত্তরে হলভৃদ্বিষ্ণুঃ পদ্মকিঞ্জল্কসন্নিভঃ।
আগ্নেয্যামরৱিন্দাভো মুসলী মধুসূদনঃ॥ ৩ ॥

ত্রিৱিক্রমঃ খডগপাণির্নির্ৱৃত্যাং জ্বলনপ্রভঃ।
ৱাযৱ্যাং ৱামনো ৱজ্রী তরুণাদিত্যদীপ্তিমান্॥ ৪ ॥

ঐশান্যাং পুণ্ডরীকাভঃ শ্রীধরঃ পট্টসাযুধঃ।
ৱিদ্যুতপ্রভো হৃষীকেশো হ্যৱাচ্যাং দিশি মুদ্গরী॥ ৫ ॥

হৃতপদ্মে পদ্মনাভো মে সহস্রার্কসমপ্রভঃ।
সর্ৱাযুধঃ সর্ৱশক্তিঃ সর্ৱজ্ঞঃ সর্ৱতোমুখঃ॥ ৬ ॥

ইন্দ্রগোপকসঙ্কাশঃ পাশহস্তোপরাজিতঃ।
স বাহ্যাভ্যন্তরং দেহং ৱ্যাপ্য দামোদরঃ স্থিতঃ॥ ৭ ॥

এৱং সর্ৱত্র মচ্ছিদ্রং নামদ্বাদশপঞ্জরম্।
প্রৱিষ্টোহং ন মে কিঞ্চিদ্ভযমস্তি কদাচন॥ ৮ ॥
ভযং নাস্তি কদাচন ওং নম ইতি ॥

ওং আপদামপহর্তারং দাতারং সর্ৱসংপদাম্।
লোকাভিরামং শ্রীরামং ভূযো ভূযো নমাম্যহম্॥ ১ ॥

আর্তানামার্তিহন্তারং ভীতানাং ভীতিনাশনম্।
দ্বিষতাং কালদণ্ডং তং রামচন্দ্রং নমাম্যহম্॥ ২ ॥

নমঃ কোদণ্ডহস্তায সন্ধীকৃতশরায চ।
খণ্ডিতাখিলদৈত্যায রামাযাপন্নিৱারিণে॥ ৩ ॥

রামায রামভদ্রায রামচন্দ্রায ৱেধসে।
রঘুনাথায নাথায সীতাযাঃ পতযে নমঃ॥ ৪ ॥

অগ্রতঃ পৃষ্ঠতশ্চৈৱ পার্শ্বতশ্চ মহাবলৌ।
আকর্ণপূর্ণধন্বানৌ রক্ষেতাং রামলক্ষ্মণৌ॥ ৫ ॥

সন্নদ্ধঃ কৱচী খডগী চাপবাণধরো যুৱা।
গচ্ছন্ মমাগ্রতো নিত্যং রামঃ পাতু সলক্ষ্মণঃ॥ ৬ ॥

অচ্যুতানন্তগোৱিন্দ নামোচ্চারণভেষজাত্।
নশ্যন্তি সকলা রোগাসসত্যং সত্যং ৱদাম্যহম্॥ ৭ ॥

সত্যং সত্যং পুনসসত্যমুদধৃত্য ভুজমুচ্যতে।
ৱেদাচ্ছাস্ত্রং পরং নাস্তি ন দৈৱং কেশৱাতপরম্॥ ৮ ॥

শরীরে জর্ঝরীভূতে ৱ্যাধিগ্রস্তে কলেবরে।
ঔষধং জাহ্নৱীতোযং ৱৈদ্যো নারাযণো হরিঃ॥ ৯ ॥

আলোড্য সর্ৱশাস্ত্রাণি ৱিচার্য চ পুনঃ পুনঃ।
ইদমেকং সুনিষ্পন্নং ধ্যেযো নারাযণো হরিঃ॥ ১০ ॥

কাযেন ৱাচা মনসেন্দ্রিযৈর্ৱা
    বুদ্ধ্যাত্মনা ৱা প্রকৃতেঃ স্বভাৱাত্।
করোমি যদ্যত্ সকলং পরস্মৈ
    নারাযণাযেতি সমর্পযামি॥

যদক্ষরপদভ্রষ্টং মাত্রাহীনং তু যদ্ভৱেত্।
ততসর্ৱং ক্ষম্যতাং দেৱ নারাযণ নমোস্তু তে॥

ৱিসর্গবিন্দুমাত্রাণি পদপাদাক্ষরাণি চ।
ন্যূনানি চাতিরিক্তানি ক্ষমস্ব পুরুষোত্তম॥

॥ ইতি শ্ৰীদ্বাদশনামপঞ্জরস্তোত্রং সংপূর্ণম্॥